# Shri Lakshminrisimha Ekakshari Mantrah

# શ્રીલક્ષ્મીનૃસિંહ એકાક્ષરી મન્ત્રઃ

## Document Information


Text title : Shri Lakshminrisimha Ekakshari Mantrah

File name : lakShmInRRisiMhaekAkSharImantraH.itx

Category : vishhnu, dashAvatAra, lakShmI, mantra

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.


August 4, 2025

*sanskritdocuments.org*

# શ્રીલક્ષ્મીનૃસિંહ એકાક્ષરી મન્ત્રઃ

શ્રીગણેશાય નમઃ ।
શ્રીલક્ષ્મીનૃસિંહાય નમઃ ।
અદ્યપૂર્વોચ્ચરિત એવં ગુણવિશેષણવિશિષ્ટાયાં શુભતિથૌ મમ
ચતુર્વિધપુરુષાર્થસિદ્ધ્યર્થં શ્રી
લક્ષ્મીનૃસિંહચરણપ્રસાદસિદ્ધ્યર્થં મન્ત્રારાધનં કરિષ્યે ।
બ્રહ્માનન્દં પરમસુખદં કેવલં જ્ઞાનમૂર્તિમ્ ।
દ્વન્દ્વાતીતં ગગનસદૃશં તત્વમસ્યાદિ લક્ષ્યમ્ ॥

એકં નિત્યં વિમલમચલં સર્વધીસાક્ષિભૂતમ્ ।
ભાવાતીતં ત્રિગુણરહિતં સદ્ગુરું તન્નમામિ । ઇતિ ધ્યાત્વા ।
આસન્નાથઃ ષડ્ચક્રં યન્ત્રં નિધાય ।
તદુપરિ કમ્બલાસનં વિસ્તીર્ય ।
ગન્ધાક્ષતૈઃ સમ્પૂજ્ય । તર્જન્યાં ભૂમિં સ્પૃષ્ટ્વા ।
પૃથ્વીતિ મન્ત્રસ્ય મેરુપૃષ્ઠઋષિઃ કૂર્મો દેવતા સુતલં છન્દઃ આસને વિનિયોગઃ ।
ૐ પૃથ્વિ ત્વયા ધૃતા લોકા દેવિ ત્વં વિષ્ણુના ધૃતા ।
ત્વં ચ ધારય માં દેવિ પવિત્રં કુરુ ચાસનમ્ ॥

વિશ્વશક્તયે નમઃ । માયાશક્ત્યૈ નમઃ । ચિત્શક્ત્યૈ નમઃ ।
અનન્તાસનાય નમઃ । વિમલાસનાય નમઃ । પદ્માસનાય નમઃ । યોગાસનાય નમઃ ।
પૃથ્વ્યાસનાય નમઃ । કૂર્માસનાય નમઃ । આધારશક્તયે નમઃ ।
દુષ્ટવિદ્રાવણનૃસિંહાય નમઃ । મધ્યે પરમસુખાસનાય નમઃ । ઇત્યાસને ઉપવિશ્ય-
અપસર્પતુ તે ભૂતા યે ભૂતા ભૂમિસંસ્થિતા ।
યે ભૂતા વિઘ્નકર્તારસ્તે ગચ્છન્તુ શિવાજ્ઞયા ॥

અપક્રામન્તુ ભૂતાનિ પિશાચાઃ સર્વતો દિશમ્ ।
સર્વેષામવિરોધેન બ્રહ્મકર્મ સમારભે ॥

તીક્ષ્ણદંષ્ટ્ર મહાકાય કલ્પાન્તદહનોપમ ।

ભૈરવાય નમસ્તુભ્યમનુજ્ઞાં દાતુમર્હસિ ॥

(વામપાદેન ભૂમિ ત્રિસ્તાડયેત્ ।)
સમુદ્રવસને દેવિ પર્વતસ્તનમણ્ડલે ।
વિષ્ણુપત્નિ નમસ્તુભ્યં પાદસ્પર્શં ક્ષમસ્વ મે ॥

સર્વભૂતનિવારણાય શાર્ઙ્ગાય સવર્ણાય સુદર્શનાયાસ્ત્રરાજાય હું ફટ્ ।
ઇતિ દિગ્બન્ધઃ ।
ૐ ઐન્દ્રીં દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
ૐ આગ્નેયીં દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
ૐ યામ્યાં દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
ૐ નૈરૃતિં દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
ૐ વારુણીં દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
ૐ વાયવીં દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
ૐ કૌબેરી દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
ૐ ઈશાની દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
ૐ ઊર્ધ્વાં દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
ૐ અધસ્તાં દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
ૐ અન્તરિક્ષાં દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
(શિરસિ ચક્રમુદ્રાં ત્રિપરિભ્રમ્ય ।)
(ગન્ધાક્ષતૈઃ સમ્પૂજ્ય સઙ્ઘટવિમુદ્રાં બધ્વા ।)
(અથ ગુરુપાદુકા લિખ્યતે ।)
ૐ ઐં હ્રીં શ્રીં ત્સ્રૌઃ શ્રીશમ્ભૂ ગુરુહંસોઃ સ્વરૂપનિરૂપમહેતવે
શુભાનન્દનાથકલાશક્તિ સ્વગુરુપાદુકાં પૂજયામિ ।
ૐ ઐં હ્રીં શ્રીં ત્સ્રૌઃ શ્રીશમ્ભૂ ગુરુ રૌમ્ ।
સ્વચ્છપ્રકાશવિમર્શહેતવે આનન્દાનન્દનાથ ભરૂણ્ડાશક્તિપરમગુરુ
શ્રીપાદુકાં પૂજયામિ ।
ૐ ઐં હ્રીં શ્રીં હંસૌઃ શ્રીશમ્ભૂગુરુ હંસૌઃ સ્વાત્મારામપઞ્જરવિલીનતેજસે ।
ગોવિન્દાનન્દનાથ ચિદમ્બાશક્તિપરમેષ્ટિગુરુ શ્રીપાદુકાં પૂજયામિ ।
ૐ ઐં હ્રીં શ્રીં હંસૌઃ શ્રીશમ્ભૂગુરુ હંસૌઃ સ્વરૂપનિરૂપણહેતવે સ્વચ્છપ્રકાશવિમૃશ્યહેતવે ।
સ્વાત્મારામપઞ્જરવિલીનતેજસે લક્ષ્મીનિવાસાનન્દનાથ સુન્દરામ્બાશક્તિ
પરાત્પરગુરુ શ્રીપાદુકાં પૂજયામિ ।
અઙ્ગુષ્ઠાગ્રે તુ ગોવિન્દં તર્જન્યાં તુ મહીધરમ્ ।

મધ્યમાયાં હૃષીકેશં અનામિકાયાં ત્રિવિક્રમમ્ ॥

કનિષ્ઠિકાયાં ન્યસેદ્વિષ્ણું કરમધ્યે તુ માધવમ્ ।
એવં ચ કરવિન્યાસં સર્વપાપપ્રણાશનમ્ ।
ભૂઃ પાદાભ્યાં નમઃ । ભુવઃ જાનુભ્યાં નમઃ ।
સ્વઃ કટિભ્યાં નમઃ । મહઃ નાભ્યૈ નમઃ ।
જનઃ હૃદયાય નમઃ । તપઃ કણ્ઠાય નમઃ ।
સત્યં લલાટાય નમઃ । પરબ્રહ્મ શિરસે સ્વાહા ।
ઊર્ધ્વકેશિ વિરૂપાક્ષ માંસશોણિતભોજને ।
તિષ્ઠ દેવિ શિખાબન્ધે ચામુણ્ડે અપરાજિતે ॥

સ્વશિરસિ ગું ગુરુભ્યો નમઃ ।
પં પરમગુરુભ્યો નમઃ ।
પં પરમેષ્ટિગુરુભ્યો નમઃ ।
પં પરાત્પરગુરુભ્યો નમઃ ।
દક્ષિણબાહુમૂલે ગણાનાં ત્વા ઇતિ ।
ગં ગણપતયે । વામબાહુમૂલે દું દુર્ગાયૈ નમઃ ।
દક્ષિણપાદમૂલે ક્ષં ક્ષેત્રપાલાય નમઃ । અં આત્મને નમઃ ।
પં પરમાત્મને નમઃ । સં સત્ત્વાત્મને નમઃ ।
રં રજાત્મને નમઃ । તં તમાત્મને નમઃ ।
હ્રીં જ્ઞાનાત્મને નમઃ । મોક્ષાર્થં જપે વિનિયોગઃ ।
ઇતિ ભૂમિશુદ્ધિઃ । ગુરુપાદુકામન્ત્રજપઃ ।
અહોરાત્રિભ્યાં નિશ્વાસો સ્વા સ્વરૂપેણ ષટ્શતાધિકમેકવિંશતી ।
સહસ્રં જપાનાં વિવેધયિત્વા । અજપામન્ત્રઃ ।
ૐ હ્રીં હંસઃ સો હમ્ । અજપાગાયત્રી ।
હંસ હંસાય વિદ્મહે સોઽહંસાય ધીમહિ તન્નો હંસઃ પ્રચોદયાત્ ।
અતો એકાક્ષર ગણપતિમન્ત્રઃ । ૐ શ્રીં ગં ૐ ।
અસ્ય શ્રીનૃસિંહ એકાક્ષરી મન્ત્રસ્ય અત્રિઋષિઃ ગાયત્રી છન્દઃ ।
શ્રીનૃસિંહો દેવતા । ક્ષ્રૌં બીજમ્ । હ્રીં શક્તિઃ । ફટ્ કીલકમ્ ।
મમ ચતુર્વિધપુરુષાર્થસિદ્ધ્યર્થં જપે વિનિયોગઃ ।
અથ ન્યાસઃ । અત્રિઋષયે નમઃ શિરસિ । ગાયત્રી છન્દઃ મુખે ।
શ્રીલક્ષ્મીનૃસિંહદેવતા હૃદયે । રૌં બીજાય નમઃ ગુહ્યયોઃ ।
ક્ષ્રૌં શન્ચય નમઃ પાદયોઃ । રં કીલકાય નમઃ સર્વાઙ્ગે ॥

અથ કરન્યાસઃ ।
ક્ષ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ક્ષ્રીં તર્જનીભ્યાં નમઃ ।
ક્ષ્રૂં મધ્યમાભ્યાં નમઃ ।
ક્ષ્રૈં અનામિકાભ્યાં નમઃ ।
ક્ષ્રૌં કનિષ્ઠિકાભ્યાં નમઃ ।
ક્ષ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અથ હૃદયાદિન્યાસઃ ।
ક્ષ્રાં હૃદયાય નમઃ ।
ક્ષ્રીં શિરસે સ્વાહા ।
ક્ષ્રૂં શિખાય વષટ્ ।
ક્ષ્રૈં નેત્રત્રયાય વૌષટ્ ।
ક્ષ્રૌં કવચાય હુમ્ ।
ક્ષ્રઃ અસ્ત્રાય ફટ્ ॥

ૐ ભૂર્ભુવસ્વરોમિતિ દિગ્બન્ધઃ ।
અથ ધ્યાનમ્ ।
સત્યજ્ઞાન સુખસ્વરૂપમમલં ક્ષીરાબ્ધિમધ્યસ્થલમ્ ।
યોગારૂઢમતિપ્રસન્નવદનં ભૂષા સહસ્રોજ્વલમ્ ॥

ત્ર્યક્ષં ચક્રપિનાકસાભયવરં બિભ્રાણમર્કચ્છવિ ।
છત્રીભૂત ફણીન્દ્રમિન્દુધવલં લક્ષ્મીનૃસિંહ ભજે ॥

(ઇતિ ધ્યાત્વા માનસોપચારે સમ્પૂજ્ય જપં કુર્યાત્ ।)
માં માલે મહામાયે સર્વશક્તિસ્વરૂપિણી ।
ચતુર્વર્ગસ્ત્વયિ દેવિ તસ્માન્મે સિદ્ધિદા ભવ ॥

(પુનઃ જપાન્તે માલાં શિરસિ નિધાય ।)
ગુહ્યાતિગુહ્યગોઽસિ ત્વં ગૃહાણં ત્વત્કૃતં જપમ્ ।
સિદ્ધિર્ભવતુ મે દેવિ ત્વત્પ્રસાદાન્મયિ સ્થિરે ॥

(ઇતિ જપં સમર્પ્ય ગુરું ધ્યાત્વા પૂર્વન્યાસાદિકં કુર્યાત્ ।)
મૂલમન્ત્ર । ૐ શ્રીં ક્ષ્રૌં ૐ ।

(વત્સગુલ્મ-વાશીમ-હે સુમારે ૧૪૦૦ વર્ષાપૂર્વી "વાકાટક" નાવાચ્યા રાજઘરાણ્યાચ્યા રાજધાનીચે નગર વ વિદ્યેચે વ સંસ્કૃતીચે કેન્દ્ર હોતે. "વત્સગુલ્મ માહાત્મ્ય" પદ્મપુરાણાન્તર્ગત આહે. યા મહાત્મ્યાન્ત વર્ણિલેલ્યા ૧૦૮

તીર્થસ્થાનામ્મધ્યે “શ્રીકરુણેશ્વર દેવતા” વ “પદ્મતીર્થ” હી દોન પ્રમુખ હોત. પદ્મપુરાણાચા રચનાકાલ સુમારે ૨ હજાર વર્ષાપૂર્વીચા અસાવા અસે માનતાત. યા ગાવાચ્યા ઉત્તરેસ સમુદ્રસ્પર્ધી અસે “ચન્દ્રસરોવર” નામક સરોવર હોતે. આજ માત્ર ત્યાચા માગમૂસહી નાહી । ભારતીય જ્યોતિષશાસ્ત્રાન્ત ભૂમધ્યરેષા વત્સગુલ્માન્તૂન ગેલ્યાચે વર્ણન આહે. યા સ્થાનાતીલ મધ્યમેશ્વર દેવતેચે વર્ણન યા મહાત્મ્યાન્ત આહે. હે માહાત્મ્ય પૂસ નદીચ્યા ઉગમસ્થાની, શિવલિઙ્ગ-સ્થાની, વસિષ્ઠ આશ્રમાન્ત કર્નાટક દેશાન્તીલ કનકપૂરચા રાજા વાસુકિ યાલા આણિ ત્યાચ્યા પત્નીલા વસિષ્ઠઋષીને સાંગિતલે. યા વત્સગુલ્માસ વાસુકીપુરી મ્હણતાત. શિવબ્રહ્મહત્યેચ્યા કથેચ્યા અનુષંગાને વત્સગુલ્મક્ષેત્રાચે નામમાત્ર નિવેદન આલે આહે આણિ ત્યાચ્યા આધારાવર હા “વત્સગુલ્મ” માહાત્મ્યાચ્યા “પદ્મપુરાણે” અસા સમ્બન્ધ દર્શવિલા આહે. પ્રત્યક્ષ હે માહાત્મ્ય પદ્મપુરાણાત નાહી ।)

ઇતિ શ્રીલક્ષ્મીનૃસિંહ એકાક્ષરી મન્ત્રઃ સમ્પૂર્ણઃ ।

Proofread by M K Barman

---

*Shri Lakshminrisimha Ekakshari Mantrah*

pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*